CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 244

Title Śatacaṇḍīvidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 244 Subject : Tantric Ritual.

Title : śataćandī vidhāna.

Author : — Scribe : —

Date of the work : — Date of the Ms. : V.S.1796

Place of the work : — Place of the Ms. : Surat.

Size : 11·8" x 6·7" Extent : 16 foll

Language : Sanskrit. Script : Devanāgarī

Remarks : Complete.

यथोक्तविधिनायागेह्यस्मा
त्रियःकृतोजपः॥ सर्वंतिष्ठति
तंपुण्यंतेनपुण्येनपुण्यवान्
भवदेवप्रसादात्वंतवपुण्यं
चतोमम॥ श्रेयसंपन्नोमंत्रः

ः॥ दुनिमश्चंडिकायै॥ ॥अथशतचंडीविधानं॥ तत्रोपहारः॥ प्राचीसाधनं। ततोदशहस्तस्पद्वाद
शहस्तंवास्वंमंडपस्यनिर्माणंकार्यं। तदुक्तंरुद्रयामलेउत्तरखंडेदेवीचरित्रेदशहस्तंद्वादशहस्तंवा
चतुर्द्वारंसुशोभनं। तोरणैस्तुपताकाद्यंमंडपंवेदिभूषितं। षोडशस्तंभसंयुक्तंचूतपल्लवशोभितं।
चतुष्कोणयुतांवेदिंमध्येकुर्यात्त्रिभागतः॥ पक्केष्टकचितांरम्यांतुच्छायेहस्तसंमितां॥ सर्वलक्षणसं
पन्नांवेदिंकुर्यान्मनोहरां॥ पंचवर्णरजोभिश्चकुर्यान्मंडलकंशुभं॥ सर्वतोभद्रसंज्ञंचमनोहारि
सुशोभनं॥ पंचवर्णवितानंकिंकिणीजालमंडितं॥ प्रवालैर्मौक्तिकैश्छत्रंबध्नीयान्नूतनंशुभं॥ श्वे
तपुष्पैस्तथारक्तैः पीतैश्चापिसुसंहतं॥ नीलोत्पलैः कोकनदैर्भूषितंश्रीफलैस्तथा॥ आम्रपल्ल
वैश्चमालाभिर्दूर्वाभिर्दूर्वाभिर्मंडपंशुभमिति। ततःकुंडंपश्चिमतःकार्यं॥ तदुक्तंदेवीचरित्रे॥ वारु
णेचभकर्णचंकुंडंलक्षणलक्षितमिति। नवकुंडंद्विहस्तमितंकार्यं। तदुक्तंसप्तशतिकाकल्पे॥ च
रस्त्रेसमेकुंडेसमंताद्धस्तमात्रके॥ एकावरणसंयुक्तेयोनिमंडलमंडिते॥ दशांशविधिनाहोम
मुक्तद्रव्येनसाधयेत्॥ नवदुर्गामखेकुंडमेवंजानीहिभूपते॥ नित्यचंडीविधानेपिकुंडमीदृक्प्रकी

त्रिनं॥ नवचंडीमखे कुंडे मौहस्तलक्षणमुच्यते॥ एतद्विगुणितं कुंडं शतचंड्याः प्रकीर्त्तितमिति
॥ एकावरणसंयुक्तं इति॥ आवरणं कुंडावरणरूपवान् मखला। तेन एकमेखलमित्यर्थः। एक
मेखलामानं तु मध्यस्त्रं चतुर्विंशतिधाविभज्य तदंशैः षड्भिरंशैस्तत्स्यविस्तारा। तावत्तुंगा चे
ति॥ तदुक्तं वाजपेय्यां॥ षडंशविस्तृतोन्नताथवैकिकेवमेखलेति। एतद्विगुणितं कुंडमित्यर्थः
ति॥ एकस्मात् पूर्वोक्तादेकहस्तकुंडात् द्विगुणितं द्विहस्तमित्यर्थः॥ दशध्वज॥ दशपता
का। षोडशहस्तदंडो महाध्वजः॥ स्रुक्स्रुवौ पूर्णाहुत्यर्थमौदुंबरकाष्ठनिर्मितः। अनालः॥ कं
भ२० कोडियां५० सूत्रशेर१ अश्वत्थोदुंबरप्लक्षाम्रन्यग्रोधानां पल्लवा॥ सुद्रापन२० फोफलशेर१
नालिकेर२५ पंचवर्णानि पंचरजांसि सर्वतोभद्रमंडलार्थं। पंचवर्णकोवितानः॥ एकस्तवर्णनिर्मिता
अष्टादशभुजाऽष्टभुजा वा देवीमूर्त्तिः। तदुक्तं देवीचरित्रे। मूर्त्तिर्देव्याः प्रकर्तव्या सुवर्णस्य पलेन तु
तदर्द्धेन च कुर्यात्तु तदर्द्धेन महात्मने। अष्टादशभुजा देवी कुर्याद्वाष्टकरामपि॥ इति॥ हीरनात्रं
गोस्सा१ तदुक्तं देवीचरित्रे। पट्टकूलयुगच्छन्नां वेदिमध्ये निधापयेत्॥ उपाहवाचनार्थं ता
म्रकलश१ बलिदानार्थं माषमिश्रितं तंदुलशेर२॥ तीर्थोदकं। सर्वौषध्यः। उपलोट। दारुहलद।

कुंकाद्दलघ्न।चंदन।वालो।वचा।कचुरो।मुस्ता।छड॥ इतिउपहारः।कस्तूरिकुंकमचंदनकर्पूरसुव
र्णरजतान्वितोदेया।अलंकारः।श्वेतपुष्पाणि।अगरु।गुग्गुल।ताम्रमयंदीपभाजनं।घृतमण१नै
वेद्यार्थंत्विष्टान्नशर्करान्वितपायस१दशजापका।आचार्य१ब्रह्मा१।अष्टौद्वारपालाः।एवंविं
शति।वरणसामग्री।वस्त्रयुग्मानि।हस्तमुद्रा।कर्णमुद्रा।उपवीत।मधुपर्कोपहाराः।पालाश
स्यसमिद्धः३०००॥अर्कःपलाशखदिरोअपामार्गोथपिप्पलः॥उदुंबरःशमीदूर्वाकुशाश्च
समिधःक्रमात्॥इतिनवग्रहसमिद्धः॥द्राक्षाइक्षु।इंगनारींग।जंबीर।बीजपूरक।खारे
क।नालिकेर।दाडिमानि॥इतिक्रमाद्ग्रहाणांफलानि।दक्षिणाजापकेभ्यएकैकंसुवर्णं।
द्वेसुवर्णेगुरवे।सोपस्कराशय्यादेवीनक्षायकस्मैचित्।कपिलागोः।नीलमणिःश्वेताश्वः।
छत्रं।चामर।दासी।दास।अजः।अवि।अन्यान्यपिचरथमहिषीहस्तभूमिवस्त्रतीति॥ॐ
क्रमाद्घृतधेनुवस्त्रालंकारभूषणादिदानानि।तदुक्तंदेवीचरित्रे।दक्षिणांप्रददेत्पश्चा २
द्धेमवस्त्रादिकांतदा॥जापकेभ्योद्विशोस्वर्णंगुरवेद्विगुणंदिशेत्।शय्यांसोपस्करांदद्या
देवीनक्षायसुव्रत।कपिलागोनीलमणिःश्वेताश्वंछत्रचामरं।अन्यान्यपिचदानानिदासी

दासमजाविकं॥कुंकुमाक्तवस्त्राणिभूषालंकारभूषणमिति।ततःपंचामृतःदेव्याहोमद्रव्याणि।
पायसश्चरुः॥गडुची।दुर्वा।शुक्लास्तिलामणा१।यवद्रोर१० नानाविधानिपुष्पाणिकुशा।चंदन
इत्येवमादीनुपहारान्संभृत्यशोभनेदिवसेविष्ट्यादिदोषवर्जितेकर्तृश्चंद्रबलोपेतेप्रातरु
त्थायदंतधावनादिकंविधाय॥नदींगत्वा।नद्यादौविधिवत्स्नात्वा।नित्यमात्रेणसंस्थितःदर्भांज
लिर्निरात्मानंनवबीजेनपावयेत्॥ ऐं ह्रीं क्लीं चामुंडायै विच्चे॥इतिनवबीजानि।कृत्वामाध्यार
क्त्रिकंसर्वमुदकांतेसमाहितः॥तर्पणंचंडिकायास्तुषडंगन्यासपूर्वकं।मायाबीजंतारपूर्वंवि
त्वर्थ्यंतांतुचंडिकां।मोक्षार्थंहृदयादीनिषडंगानिप्रकल्पयेत्।सयथा॥ॐह्रींचंडिकायैहृदया
यनमः॥उदकोपस्पर्शनं॥ॐह्रींचं०शिरसेस्वाहा॥ॐह्रींचं०शिखायैवषट्।ॐह्रींचं०कवचाय
हुं॥ॐह्रींचं०नेत्रत्रयायवौषट्॥ॐह्रींचं०अस्त्रायफट्॥एवंन्यासविधिंकृत्वाध्यात्वामहिषम
र्दिनी॥चंडिकांत्रिजगद्धात्रीब्रह्माद्यमरवंदितां॥ततोनवात्ममंत्रांतेचंडिकांतर्पयामितिजलां
जलीमष्टशतंसुगंधिकुसुमान्वितं॥अशक्तश्चेत्तदर्धेनतदर्द्धार्द्धेनवाभुनः॥सयथा॥मूलेनचंडि
कांतर्पयतांइति।एवंमहालक्ष्मींसंतर्प्य।ततोयत्रस्थलेशिवालयादौस्थदेवागारेतत्रचंडीविकीर्षता॥

र्मसंपत्त्यैब्रह्माणं त्वामहं वृणे॥ ब्रह्मजज्ञानमितिमंत्रंपठेत्॥ वृतोस्मीतिविप्रोब्रूयात्॥ ततः आचा
र्यावाहनं॥ आवाहयामिदेवेशमाचार्यंयज्ञकारिणं॥ पुराणन्यायमीमांसावेदशास्त्रार्थपा
रगं॥ गोत्रप्रवरसंयुक्तंशाखावेदसमन्वितं॥ कर्मसंपादनायाहमाचार्यंत्वामहं वृणे॥ बृह
स्पतेअतियइतिमंत्रः॥ जापकावाहनं॥ यथावेदायथाब्रह्मायद्यथायज्ञास्तथैवमे॥ प्रहृज्या
जापकायूयंजपयज्ञप्रसिद्धये॥ गोतमात्रिभरद्वाजवसिष्ठाद्याः समर्विता॥ गोत्रप्रवरसंयुक्ता
ःशाखावेदसमन्विताः॥ कृतः सप्तशतीपाठासंपुटेनसमन्विताः॥ शतमादौशतंचांतेजपे
न्मंत्रंनवाह्नरं॥ मध्येसप्तशतीपाठएवमेवसंपुटं॥ सकामः संपुटंकुर्यान्निःकामःसंपु
टंत्यजेत्॥ संपुटेनविनाकामानैवसिद्धिमवाप्नुयुः सर्वसिद्धिकरस्तस्माद्युष्मानीष्टेहंवृणो
म्यहं॥ वृतास्मः इतिब्राह्मणाब्रूयुः॥ द्वारपालावाहनं॥ चतुर्द्वारिस्थितायूयंवेदपारायणंक्षमं॥
कर्तुंसमर्थासत्यस्थाएतदर्थंमहंवृणोः॥ वृतास्मः॥ मृत्युंजपमंत्रजापकावाहनं॥ योपमृत्युहरो
जप्तोमृत्युंजयमनुःश्रमः॥ जपकर्मविदंशांतंतदर्थंत्वामहंवृणे॥ अथजातवेदाजापकाह्वानं॥ अ ४
रातिचयविध्वंसीनानादुरितसंक्षयः॥ दुर्गाप्रसादाज्जपतिजपार्थंत्वांवृणोम्यहं॥ इति॥ ततः ब्रह्मणे

आचार्यायकृत्विक्भ्यश्च इदमासनं॥ ततः यथादत्तं चंदनं॰ ब्रह्मणे आशा॰ अहं संप्रददे॥ इमानि
अर्चि॰स्तु॥ आचमनं॥ यथादास्यमानं भोजनं ब्रह्मणे॰ अहं संप्रददे॥ इमानि भोजनाधारछत्रोपा
नत्कमंडलुवसनासनकलशमुद्राहस्तमुद्रोपवीतादीनि वस्तूनि तन्निःक्रयीभूतं यथोपपन्नं किंचित्
द्रव्यं वा ब्राह्मणे आचार्याय॰ अहं संप्रददे॥ पुण्याहं दीर्घमायुरस्त्वित्यादीनि वरुणश्राद्धाकर्मणः प्रति॰
ष्ठिरण्यदक्षिणा॰ ब्रह्मणे॰ दे॥ अस्य वरुणश्राद्धकर्मणो॰ रहे हेहि॰ स्तु॥ आशिर्वादाः॥ अथ ब्राह्मण
प्रार्थना॥ ब्राह्मणाः संतु मे शांताः पापान्मां तु समाहिताः॥ देवानामपि दातारः पातारः सर्वदेहिनां
येषां देहे स्थिता वेदाः पावयंति जगत्त्रयं॥ रक्षंतु सततं ते मां जपयज्ञे व्यवस्थिताः॥ व्रतचंडीजपार्थं मे
संतु ते नियमान्विताः॥ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः॥ चंडीध्यानपरा नित्यं प्रसन्नमनसः
सदा॥ मा स्थिलभाषिणः संतु मा संतु परनिंदकाः॥ ममापि नियमा विप्रा भवंतु भवतामपि॥ अथ ब्रा
ह्मणा ऊचुः॥ वयं नियमसंयुक्ता तदकर्तव्यतत्पराः॥ कार्यं तव करिष्यामो विधिपूर्वं न संशयः॥ कर्त्त
व्यानां क्रियाणां का वेदाज्ञाहिं गरीयसी॥ वैदिकानहि वेदाज्ञां लंघंतं तिक दाचन॥ त्वदर्थीयं त्वया का
र्यं निःशंकं श्रद्धयान्वितं॥ वयमेतत् करिष्यामस्त्व कार्यं न संशयः॥ अथ यजमानो ब्रूयात्॥ धन्यो

हंकृतकृत्योऽहंसौभाग्योऽहंधरातले॥प्रसादाद्भवतांविप्रापवित्रोऽहंकृतोधना॥मेरुमंदरतुल्योऽहंभव
द्भिर्भूतलेकृतः॥यज्ञोविस्तारितंमेघयलक्ष्मीवृद्धिश्चमेकृता॥अद्यमेपितरस्तृप्ताःपवित्रंमेकुलंकृतं॥दे
वतानांप्रसादोपिजातोमेघैवनिर्मलः॥कार्यंकर्तुंनमेशक्तिर्नैवदातुंचदक्षिणाः॥नचपूजांविधा
तुंचनमस्कारंकरोम्यहं॥आज्ञयासर्वंकरिष्यामिवचनाद्भवतांचतत्।दयाश्रीवदसिंधूनांपूर्णं
सर्वंभविष्यति॥इतिवरणेश्राद्धःसंभाषः॥ततःस्वस्तिवाचनंकुर्यात्॥ततःगुरुर्वेद्युपरिश्रोसने
उपविश्य।आचम्यप्राणानायम्य॥पूजासंकल्पंकृत्वा।भूतशुद्धिंकुर्यात्।तत्रमूलाधारेतडित्को
टिसमप्रभांबिसतंतुतनीयसींसार्द्धत्रिवलयाकारांवर्णमयींकुंडलिनींभुजंगोपमांसंचिंत्यप्रण
वेनअंकुशमुद्रयाउत्थाप्यसुषुम्णामार्गेणब्रह्मरंध्रंनीत्वा।ब्रह्मरंध्रास्थंशिवस्वरूपेजीवेनियोजये
त्॥तत्रस्मरणंहकारंलकारमध्येप्रविलाप्य।लकारंहकारेहकारंसकारेसकारंषकारइत्यादिवि
लोममातृकायांप्रविलाप्य॥पंचभूतानिध्यायेत्॥पादादिजानुपर्यंतंपृथिवीस्थानंतत्रपार्थिवंमं ५
डलंचतुरस्रंअष्टदिक्षुवज्रलांछितंतन्मध्येलंबीजंपीतवर्णंतेनपंचगुणांपृथिवींषड्गुणोद्यानप्र
योगेणशोषयामि।ॐलंहुंफट्।जन्वादिनाभिपर्यंतंअपांस्थानंतत्रवारुणंमंडलंधनुषाकारंअभयो

छ

कंद्योः श्वेतपद्मलांछितं तन्मध्ये वं बीजं शुक्लवर्णं तेन चतुर्गुणा आपः पंचोद्घातप्रयोगेण शोषयामि
॥ वं वं फट्॥ नाभ्यादिहृदयपर्यंतं अग्निस्थानं। तत्र त्रिकोणं वह्निमंडलं कोणत्रये स्वस्तिकैरलंकृ
तं तन्मध्ये रं बीजं रक्तवर्णं तेन त्रिगुणं वह्निं चतुरुद्घातप्रयोगेण शोषयामि॥ रं रं फट्॥ हृदयादि
भ्रूमध्यपर्यंतं वायुस्थानं तत्र वर्तुलं वायुमंडलं षड्भिर्बिंदुभिर्लांछितं तन्मध्ये यं बीजं धूम्रवर्णं ते
न द्विगुणं वायुं त्रिरुद्घातप्रयोगेण शोषयामि॥ यं यं फट्॥ भ्रूमध्यात् ब्रह्मरंध्रपर्यंतं आकाशं व स्थानं
र्तुलं नभोमंडलं श्वेतध्वजलांछितं तन्मध्ये हं बीजं नीलवर्णं तेनैकगुणं नभो द्विरुद्घातप्रयो
गेण शोषयामि॥ हं हं फट्॥ ध्यानं॥ पापपुरुषस्य ब्रह्महत्या शिरस्कं च सुवर्णस्तेयभुजद्वयं॥ सुरा
पानहृदायुक्तं गुरुतल्पकटिद्वयं॥ तत्संयोगिपदद्वंद्वमंगप्रत्यंगपातकं॥ उपपातकरोमाणं रक्तश्मश्रु
विलोचनं॥ खड्गचर्मधरं क्रुद्धमंगुष्ठपरिमाणकं। अधोमुखं कृष्णवर्णं रूपं विचिंतयेत्। ततः पापपुरुष कुक्षौ
दहनं कुर्यात्। यमिति वायुबीजस्य किष्किंधऋषिः जगती छंदः। महावायुनवरूपी देवता यं बीजं बिंदु
शक्तिः तेन महाप्रलयवायुनास्मन्मनोवाकायकृतपापपुरुषं शोषयामि। वायुधारणं। पूरक १६
कुंभक ३२ रेचक ८ एवं सर्वत्र। रमित्यस्याग्निबीजस्य कश्यपऋषिः जातवेदाग्निर्देवता रं बीजं बिंदु शक्तिः
त्रिष्टुप्छंदः

त्र॰मि॰द्ध तेनसार्धंसिद्धमहाप्लवयाग्निनातंपापपुरुषंसंदहेत्। वमित्यमृतबीजस्यहिरण्यगर्भऋषिः गायत्रीछं
दः परमात्मादेवता। वंबीजंबिंदुशक्तिः। अस्मन्मनोवाक्कायकृतपापपुरुषाधिष्ठितंदग्धशरीरंभस्म
प्लावनेविनियोगः। ब्रह्मरंध्रस्थितचंद्रमंडलसहस्रदलकमलकर्णिकामध्यवर्त्तितद्बीजस्रवदमृत
धारासहस्रैः कलेवरमाप्लवितंध्यायेत्। लमितिपृथ्वीबीजस्यवासहऋषिः गायत्रीछंदः। पृथ्वी
देवतालंबीजंबिंदुः शक्तिः। तेनबीजेनतद्भस्मपुंजंकठिनमंडंहिरण्मयंकृत्वा। हमित्याकाश
बीजस्यपरमेष्ठीप्रजापतिर्ऋषिः गायत्रीछंदः आकाशोदेवताहंबीजंबिंदुः शक्तिःतेनबीजेनर
ध्रारविवरंब्रह्मांडंप्रविश्य। ततः द्वादशांतेस्थितजीवात्मानंसोहंमंत्रेणस्वहृदयारविंदेसमानी
यप्राणप्रतिष्ठांकुर्यात्। अस्यप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुरुद्राऋषयः शिरसि। ऋग्यजुःसा
मानिछंदांसिमुखे। प्राणशक्तिर्देवताहृदि। आंबीजंनाभौ। ह्रींशक्तिर्गुह्ये। क्रौंकीलकंपादयोः। इति
ऋष्यादि॥ अंकं४ङंआंअंगुष्ठाभ्यांनमः। इंचं४ईंक्रींतर्जनीभ्यांनमः। उंटं४ऊंक्रोंमध्यमा०। एंतं४
ऐंआंअनामिका०। ओंपं४औंक्रींकनिष्ठिका०। अंयं४अःक्रौंकरतलपृष्ठ०॥ इतिकरन्यासः॥ अंकं४आं
आकाशवायुतेजोपृथिव्यात्मनेहृ०। इंचं४ईंशब्दस्पर्शरूपरसगंधात्मनेशिर०। उंटं४ऊंश्रोत्रचक्षु ६

अं यं ६ मा॰

चक्षुर्जिह्वाघ्राणात्मने शिखायै०।ऐं तं ४ ऐं वाक्पाणिपादपायूपस्थेनिक कवचाय हुं।उं पं ४ अं वचनादानगति
विसर्गानंदात्मने नेत्रत्र°।अः मनोबुद्ध्यहंकारचित्तात्मने अस्त्राय०॥इति षडंगः।२॥आं नमः नाभ्यादि
पादपर्यंतं न्यसेत्।ह्रीं नमः हृदयादिनाभिपर्यंतं०।क्रों नमः मस्तकादिहृदयपर्यंतं।यं नमः ब्रह्मरंध्रे
रं नमः सीमंते।लं नमः ललाटे।वं नमः भ्रूमध्ये।शं नमः कंठकूपे।षं नमः हृदये।सं नमः नाभौ।हं नमः
लिंगे।क्षं नमः मूलाधारे।इति विन्यस्य प्राणशक्तिं ध्यायेत्।रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधि
रूढा कराब्जैः पाशं कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पंचबाणान्।बिभ्राणा सृक्कपालं त्रिनयन
विलसत्पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥इति ध्यात्वा हृदि कर
तलं निधाय।आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोऽहं मम प्राणाः इह प्राणाः आं ह्रीं क्रों यं० सोऽहं मम जीव इ
ह स्थितः।आं ह्रीं क्रों यं० सोऽहं मम सर्वेंद्रियाणि।आं ह्रीं क्रों यं० सोऽहं मम वाङ्मनश्चक्षुःश्रोत्रजिह्वा
घ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा॥इति त्रिः पठेदिति प्राणप्रतिष्ठा॥अथ मातृकान्यासः।
अस्य श्रीमातृकासरस्वतीमंत्रस्य ब्रह्मा ऋषिः शिरसि।गायत्री छंदो मुखे।मातृकासरस्वती देवता हृ
दि।हलः बीजानि नाभौ।स्वराः शक्तयः गुह्ये।व्यक्तयः कीलकं पादयोः।नवार्णांगत्वेन न्यासे विनियोगः॥

पा१

अंकं४आंअंगुष्ठाभ्यांनमः।इंचं४ईंतर्जनीभ्यां।उंटं४ऊंमध्यमा०।एंतं४ऐंअनामि०।ओंपंफं४औंकनिष्ठि०
अंयं८अःकरतलपृष्ठा०।इतिकरन्यासः।एवमेवषडंगः।।ततःस्वरैःह्रस्वकंकादिपंचकैःऊंनकंयादिनीस्व
कमितित्रिःप्राणानायम्य।अंनमातृकांध्यायेत्।।आधारेलिंगनाभौहृदयसरसिजेतालुमूलेललाटेद्वे
पत्रेषोडशारेद्विदशदशयुतेद्वादशार्द्धेचतुष्के।।वासांतेबालमध्येडफकठसहितेकंठमध्येस्वराणांहं
क्षंतत्वार्थयुक्तंसकलदलयुतंवर्णरूपंनमामि।।इतिध्यात्वाकंठदेशेविशुद्धेषोडशदलेषुप्रादक्षिण्येन
अंअंनमः एवंषोडशस्वरान्विन्यस्य।हृदयेअनाहतेद्वादशदलेषुप्रादक्षिण्येन।अंकंनमः एवंद्वादश
दलान्विन्यस्य।नाभौमणिपूरेदशदलेषुप्रादक्षिण्येन।अंडंनमः एवंदशवर्णान्विन्यस्य।लिंगेस्वाधि
ष्ठानेषट्दलेषुप्रादक्षिण्येन।अंबंनमः एवंषड्वर्णान्विन्यस्य।त्रिवेण्यांमूलाधारेचतुर्द्दलेषुप्रादक्षि
ण्येन।अंवंनमः एवंचतुर्वर्णान्विन्यस्यभ्रूमध्येआज्ञायांद्विदलायाः।अंहंनमः दक्षे।अंक्षंनमः वामे
ततः ब्रह्मरंध्रेसहस्रारेसहस्रदलकर्णिकायांत्रिकोणंविभाव्य।तिस्रष्वरेखासुप्रादक्षिण्येन।अं
१६कं१६थं१६हंक्षंमध्ये।इतिविन्यसेदिवंनमातृकान्यासः।ततःबहिर्मातृकांध्यायेत्।पंचाशद्वर्णै ७
र्देवीविहितवदनदोःपादयुक्कुक्षिवक्षोदेशांभास्वत्कपर्द्दाकलितशशिकलामिंदुकुंदावदातां।।

मुखवृत्तेमै

अक्षस्रक्कुंभचिंतालिखितवरकरांत्रीक्षणांपद्मसंस्थामछाकल्पामतुछस्तनजघनभरांभारतींतां
नमामि॥इतिध्यात्वा॥अंनमः।मूर्ध्नि।आं०ललाटे।इंईं०नेत्रयोः।उंऊंकपोलयोः।ऋंॠंश्रोत्रयोः।
ऌंॡंनासापुटयोः।एंऐंओष्ठयोः।ओंऔंदशनपंक्तयोः।अंजिह्वायां।अःतालुस्थाने।कवर्गंदक्षिण
हस्तस्यसंधौ।तदग्रेष्वन्यसेत्।चवर्गंवामहस्तसंधौतदग्रेषु।टवर्गंदक्षिणे पादसंधौ।तवर्गंवा
मपादसंध्यग्रेषु।पवर्गंहृदिविन्यसेत्॥यंनमःत्वचि।रंनमःरक्ते।लंनमःमांसे।वंनमःमेदे।शंनमः
अस्थ्नि।षंनमःमज्जायां।संनमःरसे।हंक्षंनमःशुक्रे।इति॥अथद्वितीयसारस्वतोन्यासः॥ॐऐं
क्लींक्लींनमःकनिष्ठिकाभ्यांनमः।पअनामिकाभ्यांनमः।ॐपमध्यमाभ्यां०।ॐपतर्जनी०।ॐपअंगु
ष्ठाभ्यां०।ॐपकरतलाभ्यां०।ॐपकरपृष्ठाभ्यां।ॐपदक्षिणकूर्परे।ॐपवामकूर्परे।ॐपदक्षिमणिबंधे।
ॐपवाममणिबंधे।ॐपहृदयायनमः।उदकोपस्पर्शनं॥ॐपशिरसेस्वाहा॥ॐपशिखायैवषट्॥ॐप
हृदयायनमः।उदकोपस्पर्शनं॥ॐपशिरसेस्वाहा॥ॐपशिखायैवषट्॥ॐपशिखायैवषट्॥ॐपकव
चायहुं॥ॐपनेत्रत्रयायवौषट्॥ॐपअस्त्रायफट्॥इतिदिक्षुदिग्बंधोर्ध्वंअस्त्राकरतालिकयाक्षिपे
त्॥इति॥तृतीयोमातृन्यासः।ॐक्लींब्रह्माणीपूर्वतःपातुइतिपूर्वस्यांपुष्पाणिक्षिपेत्।क्लींमाहेश्वरी

दु

आग्नेय्यां पातु। ह्रीं कौमारी दक्षिणे पातु। ह्रीं वैष्णवी नैरृत्यां पातु। ह्रीं वाराही पश्चिमे पातु। ह्रीं नारसिं
ही वायव्यां पातु। ह्रीं ऐंद्री उत्तरे पातु। ह्रीं चामुंडा ईशान्यां पातु। ह्रीं व्योमेश्वरी ऊर्द्ध्वं पातु। ह्रीं सप्तद्वी
पेश्वरी भुवि पातु। ह्रीं नागेश्वरी पाताले पातु। ह्रीं इति॥ चतुर्थः षट् देवीन्यासः। ह्रीं कमलांकुशाद
स्तानां दापूर्वांगे पातु। खड्गपात्रकरा रक्तदंतिका दक्षिणांगे पातु। पुष्पपल्लवमूलादिहस्ता शा
कंभरी पश्चिमांगे पातु॥ धनुर्बाणधरा दुर्गा वामांगे पातु। शिरःपात्रकरा भीमा मस्तकाच्चरणपर्यं
तं पातु। चित्रकांतिश्चित्रभ्रमरपाणिः भ्रामरी चरणान्मस्तकांतं पातु॥ इति चतुर्थः॥ ह्रीं पादादिनां
भिपर्यंतं ब्रह्मा पातु। नाभ्यादि कंठपर्यंतं जनार्द्दन पातु। कंठाच्छिरःपर्यंतं रुद्रः पातु। हंसः पदद्व
ये पातु वैनतेयः करद्वयं पातु। चक्षुषी वृषभः पातु सर्वांगानि गजाननः पातु। अंगपरं परा हरिः पातु।
इति। अथ षष्ठो महालक्ष्म्यादिन्यासः॥ अष्टादशभुजा महालक्ष्मी मध्यं पातु। अष्टभुजा सरस्वती
ऊर्द्ध्वं पातु। इतिकज्ज्वांगि। नितंबाढ्यो वनमंडिता महाकाली अधः पातु। सिंहो हस्तद्वयं पातु। परम
हंसः अक्षणजेः पातु। महिषेण समायुक्तः प्रेतः पादद्वयं पातु॥ सर्वांगानि महेशानी पातु। चंडि
का परापरं अंगं पातु। इति षष्ठः। अथ सप्तमः। ॐ ब्रह्मरंध्रे। ऐं दक्षिणनेत्रे। ह्रीं वामनेत्रे। ह्रीं दक्षि

८

णकर्णे। ह्रांवामकर्णे। मुं दक्षिणनासापुटे। डा वामनासापुटे। ये मुखे। वि लिंगे। च्चे गुदे। इति
अथ अष्टमः॥ ॐ गुदे। ऐं लिंगे। ह्रीं मुखे। क्लीं वामनासापुटे। चा दक्षिणनासापुटे। मुं वाम
कर्णे। डा दक्षिणकर्णे। ये वामनेत्रे। वि दक्षिणनेत्रे। च्चे ब्रह्मरंध्रे। अथ नवमः॥ नवाक्षरमं
त्रं मस्तकाच्चरणावधि सर्वांगे व्यसेत्। ततस्तं मंत्रं दक्षपार्श्वे। ततस्तं मंत्रं पृष्ठे। ततस्तं मं
त्रं वामपार्श्वे। तमेव मंत्रं वामपार्श्वे। तमेव पृष्ठे। तमेव दक्षपार्श्वे। तमेव चरणान्मस्तकावधि। इ
ति॥ अथ दशमः॥ मूलं कवचाय हुं॥ मूलं नेत्रत्रयाय वौषट्। मूलं अस्त्राय फट्। इति दश
मः॥ अथ एकादशमः॥ खड्गिनी शूलिनी घोरेती श्लोकेन शीर्षतः सर्वांगे। अनेन रुस्तत्तरं शू पंचके
लेन पाहि नो देवी इत्यनेन श्लोकचतुष्टयेन दक्षिणांगे। इति बालार्कसहस्रा। सर्वस्वरूपे सर्वेशा
इति पंचश्लोकैः वामांगे॥ इति शुद्धस्फटिकसंकाशां इति एकादशो न्यासः॥ अनेन प्रका
रेण एकादशन्यासान्विधाय॥ गुरुवैद्यकपुरि ईशानकोणे कलशं संस्थाप्य। तत्र देवीमावाह्य पं
चोपचारैर्नवाक्षरेण मंत्रेण संपूज्य। मध्ये वेद्युपरि विरचिते सर्वतोभद्रमंडलमध्ये स्थापिता
स्वर्णनिर्मितामष्टादशभुजां देवीं अग्युत्तारणपूर्वकं प्रतिष्ठाप्य। आवाहनादिषोडशाभिर्मं

त्रैरूप्यबीजैर्नवाक्षरेणमंत्रेणसंकल्प्य।जापकाश्चयस्मिन्समयेमातृकादिन्यासपूर्वकं
यजमानगतंफलंसंकल्प्यचंडीपाठमारभेत्।सप्तशतीजापकाश्चपिएतान्न्यासान्कुर्युः।तदु
क्तंसप्तशतीकल्पे।~~सप्तशतीजापकाश्चपिएतान्न्यासान्कुर्युः।तदुक्तंसप्त~~॥एतेन्न्यासाश्च
कर्तव्याश्चंडीसप्तशतींजपेत्॥एवंन्यासविधिंकृत्वासृष्टिमुद्रांविलोकयेत्॥तस्यावलोकनेराज
न्कृतोन्यासस्थिरोभवेदिति॥इत्थमेकादशन्यासान्कृत्वानवाक्षरमंत्रस्यषडंगानिन्यसेत्।अ
स्यनवार्णवमंत्रस्यब्रह्मविष्णुरुद्राऋषयःमहाकालीमहालक्ष्मीमहासरस्वत्योदेवताः
गायत्र्युष्णिगनुष्टुप्छंदांसि।नंदाशाकंभरीभीमाःशक्तयःपरमशिवलिंगरक्तदंतिकादुर्गाभ्राम
रीबीजानि।अग्निवायुसूर्यास्तत्त्वानीतिसंस्मृत्य।नवाक्षरमंत्रस्यषडंगानिन्यसेत्।मूलंअंगुष्ठा
भ्यांनमः॥मूलंतर्जनीभ्यांनमः।मूलंमध्यमाभ्यांनमः॥मूलंअनामिकाभ्यांनमः॥मूलंकनिष्ठिका
भ्यांनमः॥मूलंकरतलपृष्ठाभ्यांनमः॥मूलंहृदयायनमः।उदकं॥मूलंशिरसेस्वाहा॥मूलंशि ९
खायैवषट्॥मूलंकवचायहुं॥मूलंनेत्रत्रयायवौषट्॥मूलंअस्त्रायफट्॥ततःषट्कोण
मध्यस्थांमध्यबीजेव्यवस्थितां॥महाकाल्यासरस्वत्यालंकृतांदक्षिणोत्तरे।संयुक्तांदक्षिणेवा

मेसिंदेनमद्विषेणच॥अथाद्यांतुजांध्यात्वावामेत्वालक्ष्मींप्रणम्यच॥पीठादिपूजनंकुर्यात्स्वबीजेन
पृथक्पृथक्॥ॐकारंबिंदुमध्यस्थंनामधेयाद्यमक्षरं॥देवतानांस्वबीजंतत्पूजायेकृत्सिद्धिदं॥
तेनस्वस्वबीजेनपीठदेवताआवरणदेवताश्चपूजयेदितिसिद्धं॥एवोक्तिप्रकारेणदेवींध्यात्वाताम्र
भाजनेषट्कोणंचक्रंगंधादिनाआलिख्यतदुपरिवृत्तमालिख्यतदुपर्यष्टौदलानिआलिख्यमध्येत्रि
कोणमालिख्यतत्रक्रमेणऐंक्लींह्रींबीजानिआलिख्य॥षट्कोणेषुषड्बीजानिआलिख्य॥आद्ये
बीजेमहाकालींतृतीयबीजेसरस्वतींमध्यबीजेमहालक्ष्मींस्थितांध्यात्वापूजनमारभेत्॥ततो
र्घ्यपात्रंशुद्धवारिणाआपूर्यगंधपुष्पाक्षतांस्तत्रविन्यस्यसर्वाणितीर्थानितत्रावाह्य।मत्स्यमुद्र
याआच्छादयन्मूलेनाभिमंत्र्यास्त्रेणचतुर्दिक्षुसंरक्ष्यअवगुंठनमुद्रयावगुंठ्य।तज्जलेनपूजोपक
रणंआत्मानंसंप्रोक्ष्य।देहमयपीठेस्थितांदेवींमानसैरुपचारैःसंपूज्य।बाह्यपूजार्थंपूर्वोक्तषट्को
णेपीठपूजांकुर्यात्॥तत्रादौॐकारपीठायनमः॥पूर्णपीठायनमः॥कामपीठायनमः।इतिपीठत्रयंपूज
येत्।संप्रदायात्।ततःपीठस्यपूर्वादिदिक्षु।गणेशायनमः॥क्षेत्रपालायनमः।पादुकाभ्यांनमः॥ब
टुकेभ्योनमःइतिचतुर्दिक्षु।आग्नेय्यादिचतुर्दिक्षुपूजाप्रादक्षिण्येनजयायैनमः॥विजयायैनमः॥

जयंत्यै। अपराजितायै नमः इति सर्वत्र संपूज्य। ततः पूर्वस्यां ईशकोणात् आग्नेयकोणपर्यंतं प्रादक्षि
ण्येन॥ विष्णुमायायै नमः॥ चेतनायै। बुद्ध्यै। निद्रायै। क्षुधायै। पंचशक्तीः पूजयेत्। ततो दक्षिणत आ
ग्नेयकोणात् निर्ऋतिकोणपर्यंतं॥ छायायै नमः। शक्त्यै नमः। तृष्णायै। क्षांत्यै नमः। जात्यै। लज्जायै।
षट् शक्तीः पूजयेत्। ततो नैर्ऋतिकोणात् आरभ्य वायुकोणपर्यंतं॥ शांत्यै नमः। श्रद्धायै। कीर्त्यै। लक्ष्म्यै।
धृत्यै। वृत्त्यै॥ षट् शक्तीः पूजयेत्। ततो वायुकोणं आरभ्य ईशानकोणपर्यंतं। स्मृत्यै। दयायै। तु
ष्ट्यै। पुष्ट्यै। मात्रे। भ्रांत्यै। षट् शक्तीः पूजयेत्॥ एवं पीठं संपूज्य तदुपरि पद्मनालस्य मूले आधारश
क्त्यै। कूर्मशक्त्यै। शेषशक्त्यै। पृथिवीशक्त्यै। इति पूजयेत्। पद्माय नमः इति पद्मं प्रपूजयेत्। ततः त
त्र पद्मे वह्न्यर्कसोमानां मंडलत्रयं पूजयेत्॥ ततः पूर्वपत्रादितः ईशपत्रांतं अष्टसु पत्रेषु। ब्रह्मा
ण्यै। माहेश्वर्यै। कौमार्यै। वैष्णव्यै। वाराह्यै। नारसिंह्यै। ऐंद्री। चामुंडायै। अष्टौ शक्तीः अर्चयेत्। कर्णि
कायां ब्रह्माणीं अर्चयेत्। ततः षट्सु कोणेषु पूर्वकोणतः प्रादक्षिण्येन॥ नंदजायै। रक्तदंतिका १०
यै। शाकंभर्यै। दुर्गायै। भीमायै। भ्रामर्यै। नमः इति सर्वत्र पूजयेत्॥ मध्ये पूज्यदेवी दक्षिणभागे सिंहं
वामभागे महिषं पूजयेत्। पीठादि पूजनं कुर्यात् स्वबीजेन पृथक् पृथक्॥ इति वचनात्॥ महालक्ष्मीना

मधेयाद्याक्षरेण ॥ ॐमंइत्येवंरूपेण महालक्ष्म्याः पीठं प्रजयेत् ॥ ततः सुवर्णनिर्मितमहालक्ष्मीप्रतिमा
यामग्न्युत्तारणं विधाय ॥ तस्याः हृदयादिन्यासं कृत्वा प्राणप्रतिष्ठां च कृत्वा आवाहनादिपूजां कुर्यात् ॥
तत्र प्रथमं दुर्गायाः स्वर्णमूर्तिस्थितायाः ध्यानं ॥ महिषघ्नीं महादेवीं कुमारीं सिंहवाहिनीं ॥ दानवांस्तर्ज
यंतीं च सर्वकामदुघां शिवां ॥ ध्यायामि मनसा दुर्गां नाभिमध्ये व्यवस्थितां ॥ आवाहयेत्ततो दुर्गां संसा
रभयतारिणीं ॥ इति ध्यानं विधाय ॥ कर्णोत्पांजननीं सद्यां कामदां करुणाकरां ॥ अनंतशक्तिसंपन्नां
दुर्गामावाहयाम्यहं ॥ महालक्ष्म्यै आवाहनं समर्पयामि ॥ दुर्गे देवि सुरेशानि ज्ञानमार्गप्रदेशिके ॥ आ
सनं मणिमुक्ताढ्यं गृहाण त्वं सुरेश्वरि ॥ इत्यासनं ॥ कात्यायनी महादुर्गे चामुंडे शंकरप्रिये ॥ पाद्यं गृहाण
देवेशि भद्रकालि नमोस्तु ते ॥ इति पाद्यं ॥ जगत्पूज्ये त्रिलोकेशि सर्वदानवभंजनि ॥ अष्टांगार्घ्यं गृहाण व
देवि विश्वार्तिहारिणी ॥ अर्घः ॥ सर्वलोकस्य या शक्तिर्ब्रह्मा विष्णुर्दिनिस्कृती ॥ ददाम्याचमनं तस्यै महालक्ष्म्यै
मनोहरं ॥ आचमनं ॥ ज्ञानमूर्ते भद्रकालि दिव्यमूर्ते सुरेश्वरि ॥ स्नानं गृहाण देवेशि नारायणि नमो
स्तु ते ॥ इत्यनेन मंत्रेण पंचामृतैर्जलैश्च स्नपयेत् ॥ स्नानांते आचमनं ॥ पट्टसूत्रविचित्राढ्यं नानावर्णै
सुराजितं ॥ वस्त्रं गृहाण देवेशि सुप्रीता वरदा मम ॥ इति वस्त्रं ॥ वस्त्रांते आचमनं ॥ सुरासुरशिरोरत्न

नीराजितपदद्वये॥ अलंकारान्गृहाणत्वंनानारत्नसमन्विता॥ इत्याभरणानि। श्रीखंडागरुकर्पूरैर्युक्तंश्री
खंडसंभवं॥ गृहाणगंधंदेवेशि भद्रकालिनमोस्तुते॥ इतिगंधं॥ कुसुमेनसमायुक्तैश्चंदनेनविलेपि
तैः॥ बिल्वपत्रकृताचासिदुर्गेहंशरणंगतः॥ इत्यक्षतान्॥ नानापुष्पविचित्राढ्यांपुष्पमालांसुशोभ
नां॥ प्रयच्छामिसुरेशानिसुप्रीताचवरदाभव॥ इतिपुष्पं॥ गुग्गुलंघृतसंयुक्तंनानागंधसुसंयुतं॥ गृहं
हाणचामुंडेभद्रकाल्लीनमोस्तुते॥ इतिधूपं॥ पट्टसूत्रोल्लसद्वर्त्तिगोघृतेनसमन्वितान्॥ दीपान्गृ
हाणदेवेशिनारायणीनमोस्तुते॥ इतिदीपं॥ दिव्यान्नंगोघृतोपेतंनानाभक्ष्यैःसमन्वितं॥ मयानिवे
दितंतुभ्यंनारायणीनमोस्तुते॥ इतिनैवेद्यं॥ नैवेद्यांतेआचमनं॥ गृहाणदेवीतांबूलंकर्पूरेणसंयुतं
मयानिवेदितंतुभ्यंनारायणीनमोस्तुते॥ इतितांबूलं॥ नालिकेरंगृहीत्वा॥ जयंतीमंगलाकालीभद्रका
लीकपालिनी॥ दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते॥ इत्यर्घ्यं॥ दुर्गकात्यायनीचंडीमहिषासुर
मर्द्दिनी॥ दीपमालांप्रयच्छामिसुप्रीतावरदाभव॥ इतिनीराजनं॥ प्रथमेदीवसेदशादीपाः॥ द्वितीयेदीवसे२०
तृतीये३० चतुर्थे४० एवंशतदीपाः चतुर्थदिनपर्यंतंदिनवृध्यादीपवृद्धिः॥ दुर्गेदेवीनमस्तुभ्यंनमस्त्रैलो ११
क्यपूजिते। पुष्पांजलिमयादत्तंसुगृहाणसुरेश्वरि॥ इतिपुष्पांजलिं॥ सर्वस्वरूपेसर्वेशेसर्वशक्तिस

मन्त्रिते॥जयेन्यत्र्यादिनोदेवीदुर्गेदेविनमोस्तुते॥सर्वमंगलमांगल्ये॰॥नमोस्तुते॥इतिद्वाभ्यांनमस्कारः॥
अंजलिंबध्वा॥महिषघ्नीमाहामायेचामुंडेमुडमालिनि॥यशोदेहिधनंदेहिसर्वान्कामाश्चदेहिमे॥इ
तिप्रार्थयेत्॥ततः मयाजन्मसहस्रेषु अर्जितंपापसंशयं॥तत्सर्वंनाशयेत्क्षिप्रंप्रदक्षिणंपदेपदे॥
इतिप्रदक्षिणा॥ततः पूजासमृध्यर्थंदक्षिणासंकल्पः॥पूजायाः सगुणार्थंचदक्षिणादीयतेमया॥नां
ग्रहाणमहेशानिपूजांमेसफलंकुरु॥इतिषोडशोपचारः॥ततः चतुरस्रेपूर्वादिष्टदिक्षुक्रमेणपूजये
त्॥पूर्वे॥उड्याणपीठायनमः॥उड्याणेश्वरायनमः॥उड्याणांबापादुकाभ्यां॰ततः आग्नेयेमातृका
पीठ॰मातृकेश्व॰मातृकांबापा॰ततः दक्षिणेजालंधरपीठ॰जालंधरेश्वरा॰जालंधरांबापा॰ततः
नैरृत्यांकोल्लापुरपीठाय॰कोल्लारे॰कोल्लारांबा॰ततः पश्चिमेपूर्णगिरिपीठाय॰पूर्णेश्वराय॰पूर्णांबा॰।
ततःवायव्यांचोल्हारपीठाय॰।चोल्हारेश्वराय॰सोल्हारांबा॰ततः उत्तरेलंकागिरिपीठाय॰लंकेश्व
राय॰लंकांबापा॰ईशानेकामरूपीठ॰कामेश्वराय॰कामांबा॰तत्रैवाष्टदिक्षुपूर्वादिक्रमेणअष्ट
सिद्धांतपूजयेत्॥गोरक्षनाथायनमः॥अलक्षनाथाय॰।निरंजननाथाय॰आदिनाथा॰।अनघना॰
बालनाथ॰सत्यना॰प्रेमनाथाय॰ततश्चतुरस्रचतुःकोणेषुवेतालचतुष्टयंपूजयेत्॥आग्नेयेत्॥आ

ग्नेयेअग्निमुखाय॰। नैर्ऋत्यांभीमवाहनाय॰। वायव्यांज्वालामुखाय॰। ईशान्यांधूम्रवेतालाय॰। ततश्चाष्ट
दलेपूर्वादिक्रमेणमातृचतुष्टकंपूजयेत्। ह्रींब्राह्मण्यैनमः। ह्रींमाहेश्वर्यै॰। कौमार्यै॰। वैष्णव्यै॰। नारसिंह्यै॰।
माहेंद्र्यै॰। चंडिकायै॰। ततएवभैरवाष्टकं॥ असितांगभैरवायनमः। रुद्रभैरवाय॰। चंडभैरवाय॰। क्रोध
भैरवाय॰। उन्मत्तभैरवाय॰। कपालभैरवाय॰। भीषणभैरवाय॰। संहारभैरवाय॰। ततएवअष्टदिक्पाला
न्पूजयेत्॥ इंद्रायनमः। अग्नये॰। यमाय॰। नैर्ऋतये॰। वरुणाय। वायव्ये॰। सोमाय॰। ईशानायनमः॥
ततःषट्कोणेषट्दलेषु॥ पूर्वादिक्रमेण॥ गुरवेनमः। परमगु॰। परमेष्ठीगु॰। विनायक॰। हरये॰। हराय॰।
ततस्त्रिकोणेमहाकाल्याःपृष्टः। रुद्रायनमः। गौर्यै॰। महालक्ष्म्याःपृष्ठतः। विष्णवेनमः। लक्ष्म्यै॰। महा
सरस्वत्याःपृष्ठतः। ब्रह्मणेनमः। स्वरायै॰। ततस्त्रिकोणाद्बहिः। दक्षिणेकालाय॰। वामेमृत्यवेनमः॥
ततस्त्रिकोणाधोभागेदक्षिणेसिंहायनमः॥ वामेमहिषाय॰॥ पुनस्त्रिकोणमध्येमिथुनत्रयस्यपृष्ठेरु
द्राय॰। गणपतये॰। पुनस्त्रिकोणाबहिः। उपरिभागेआधाराय॰। वामेकूर्माय॰। दक्षिणेअनंताय॰॥ १२
ततःमहालक्ष्म्यांगपूजा॥ मध्येदेवीपद्मलायैनमःपादौपूजयामि। ॐचंचलायै॰। जानुपूजयामि। कमला
यै॰। कटिं॰। कात्यायिन्यै॰। नाभिं॰। जगन्मात्रे॰। जठरं॰। विश्ववल्लभायै॰। वक्षस्थलं॰। कमलवासिन्यै॰। भुज

द्वयं॰। पद्मकलायै॰। स्तनद्वयं॰। कंबुकंठिन्यै॰। कंठं॰। सुस्मितायै॰। मुखं॰। कमलपत्राक्ष्यै॰। नेत्रत्रयं॰
श्रियै॰ शिरः॰। ततः पीठाद्बहिः। अष्टदिक्षु क्रमेण चतुःषष्टियोगिनीर्यजेयेत्॥ श्वेतवर्णास्त्रिशूलड
मरुपाशांकुशाधराः पूर्वे॥ जयायै॰। गणेश्वर्यै॰ विजयायै॰ सिद्धयोगिन्यै॰ जयंत्यै॰ महामायै॰ अपरा
जितायै॰ दिव्ययोगिन्यै॰ ८। गौरवर्णा अक्षमालांकुशावर्णाभिस्तककराः। आग्नेये। भैनायै नमः। डाकिन्यै॰।
काल्यै॰। कालरात्र्यै॰। ऊंकायै॰। रौद्र्यै॰। केनाल्यै॰। ऊंकायै॰। रक्तवर्णा ज्वालाशक्त्यभयवरकराः। दक्षि
णे। ऊर्ध्वकेशिन्यै॰। विरूपाक्ष्यै॰ शुष्कांगिन्यै॰। नरभोजनायै॰। भट्टारिकायै॰। धूम्रांगायै॰। कलहप्रि
यायै॰ ८। विद्युद्वर्णा ध्वजबाणधनुःपाशहस्ताः। नैर्ऋत्यां॥ धीरायै नमः। रक्ताक्ष्यै॰। विश्वरूपायै॰। भयं
कर्यै॰ वीरायै॰ कुमारिकायै॰। वाराह्यै॰। मुंडधारिण्यै॰। ८। रक्तोत्पलवर्णाः कमंडल्वक्षमालाभयवरक
राः पश्चिमे। भैरवायै नमः। द्वेषिण्यै॰। धूम्राक्ष्यै॰। प्रेतभोजनायै॰। खट्वांगधारिण्यै॰। दीर्घायै॰। मालि
न्यै॰। मंत्रयोगिन्यै॰। ८। धूम्रवर्णाः शंखचक्रगदापद्मधराः। वायव्यां। काल्यै नमः। चक्रिण्यै॰। कंका
ल्यै॰। भुवनेश्वर्यै॰। त्रोटक्यै॰। महामायै॰। यमदूत्यै॰। कपालिन्यै॰। ८। अंजनवर्णाः खड्गखेटकपरशु
पाशहस्ताः उत्तरे। केशिन्यै॰। मर्दिन्यै॰। रोमजंघायै॰। प्रेतचारिण्यै॰। विशालायै॰। कामुक्यै॰। लाल्यै॰

अघोमुख्यै॰। धूम्रवर्णाः कंतखेटपरिघभिंडिमालाधराः ईशाने। मुंडाग्रधारिण्यैनमः। व्याघ्र्यै॰। रोहि
ण्यै॰ प्रेतभूषण्यैनमः। धुर्जटिन्यै॰। माय्यै॰। कालिकायै॰। विश्वलविन्यै॰। ८ इति चतुःषष्टियोगिनीपूजा।
अथ चतुःषष्टिभैरवपूजा तत्रैव॥ अष्टाष्टगुणिताश्चैव भैरवाणां महागणाः॥ स्वर्गपातालमर्त्येषु वि
चरंति महाबलाः। योगिनीनां गणैः सार्द्धं सृजयेद्भैरवं गणं॥ योगिनीनां यथाध्यानं तथातेषांन्नवेन्नप।
पूर्वैशांगवे॰ नीलकंठाय॰ विशालाक्षाय॰ मार्त्तंडायनमः। मतुप्रनाय॰। स्वछंदाय॰। असिताय॰कु
ष्टाय॰ ८। आग्नेये। खेचराय॰। संचराय॰। विरूपाय॰ विरूपाक्षाय॰। नानारूपधराय॰। पराय॰। कंदवर्णा
य॰। सुधागात्राय॰। ८ दक्षिणे। उन्मत्तभैरवाय॰ मेघनादाय॰। मनोवेगाय॰। क्षेत्रपालाय॰। विशपक्षाय॰
निर्भयाय॰ वेगिताय॰ प्रेताय॰ ८ नैर्ऋत्ये॰। लोकपालनभैरवाय॰ गदाधराय॰ वज्रहस्ताय॰ महाका
लाय॰। प्रचंडाय॰। प्रजयाय॰ अंतकाय॰ भ्रामकाय॰ ८। पश्चिमे। भीषणायनमः। संहाराय॰। कुलपाला
य॰। चंडपालाय॰। प्रजापालाय॰ रक्तांगाय॰ वेगवीक्षणाय॰ अरूपाय॰ ८ वायव्यां। धरपालायनमः॥ १३
कुंडलिने॰ मंत्रायकाय॰ रुद्रपितामहाय॰ विश्वदे॰। बटुकनाथाय॰ भूतनाथाय॰ वेतालाय॰ ८।
उत्तरे॥ त्रिनेत्राय॰ त्रिपुरांतकाय॰ वरदाय॰ पर्वतवासाय॰ शशिशकलभूषणाय॰ सर्वज्ञाय॰ सर्वदेवमयाय॰।

ईशानाय॰ ८॥ ईशान्यां॥ सर्वभूतहृदिस्थाय॥ धीरसायकाय॰ भुक्तिमुक्तिप्रदाय॰ कालायैभ्रे॰ महोरोग्राय
नयानकाय॰ दक्षिणाग्निमुस्थिताय॰ ८॥ इतिवक्त्रः षष्टिर्भैरवपूजा॥ इति पूजासमाप्ताः॥ ॥अथवाशार
दातिलके अन्यानि सप्तावरणानि स्युः॥ तद्यथा॥ षट्सु कोणेषु पूर्वत आरभ्य ईशानकोणपर्यंतं मंगेः
प्रथमावरणं॥ अभिष्टसिद्धिं मे देहि शरणागतवत्सले॥ भक्त्या समर्पये तुभ्यं समस्तावरणार्चनं॥ १॥ इति पु
ष्पांजलिं दद्यात्॥ ॐ ह्रां हृदयाय नमः॥ ॐ ह्रीं शिरसे स्वाहा॥ ॐ ह्रूं शिखायै॰ ह्रैं कवचाय॰ ह्रौं नेत्रत्रयाय॰
ॐ ह्रः अस्त्राय फट् इति॥ ततो द्वितीयावरणं॥ अभिष्टसिद्धिं॰॥ पूर्वपत्रकेसरयोः॥ अकाराय नमः॥ आका
राय॰ अग्निपत्रकेसरयोः॥ इकाराय॰ ईकारा॰ दक्षिणपत्रकेसरयोः॥ उकारा॰ ऊकाराय॰ नैरृतिपत्र
केसरयोः॥ ऋकारा॰ ॠकाराय॰ पश्चिमपत्रकेसरयोः॥ ऌकाराय॰ ॡकाराय॰ वायुपत्रकेसरयोः
एकाराय॰ उत्तरपत्रकेसरयोः॥ ऐकाराय॰ औकाराय॰ ईशानपत्रकेसरयोः॥ अनुस्वारायनमः॥ विसर्गाय॰
इति द्वितीयावरणं॥ अभिष्टसिद्धिं॰॥ पूर्वपत्रे कादिवर्गाय नमः॥ अग्निपत्रे चादिवर्गाय॰ दक्षिणपत्रे
यादिवर्गाय॰ नैरृतिपत्रे तादिवर्गाय॰ पश्चिमपत्रे पादिवर्गाय॰ वायुपत्रे यादिवर्गाय॰ उत्तरपत्रे शादिव
र्गाय॰॥ इति तृतीयावरणं॥ ततः पूर्वादिअष्टपत्रेषु व्यापिनी शालिनी पाविनी क्लेदिनी धारिणी

मालिनी हंसिनी शांतिनी इत्येता अष्टौ शक्तीः पूजयेत्॥ इति चतुर्थमावरणं॥ अभीष्टसिद्धिं॥ ततस्तदुप
रिपूर्वादिक्रमेण ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इंद्राणी चामुंडा महालक्ष्मी इत्यष्टौ वि॰ अमातृ
पूजयेत्॥ इति पंचमावरणं॥ अभीष्टसिद्धिं॥ ततइंद्राग्नियमनिर्ऋतिवरुणवायुसोमेशानानंतब्र
ह्मणो दशादिक्षु दिक्पालान् पूजयेत्॥ इति षष्ठमावरणं॥ अभीष्टसिद्धिं॥ ततो वज्रशक्तिदंडखड्गपा
शध्वजगदात्रिशूलचक्रांबुजानि दिक्पालास्त्राणि पूजयेत्॥ इति सप्तमावरणं॥ अभीष्टसिष्टसिद्धिं॥
ततः पुष्पांजलित्रयं दत्वा प्रथमदिने दशकुमारीभोजनं संकल्प्य॥ दशविप्रभोजनसंकल्पं कुर्यात्॥
द्वितीयदिने विंशतिकुमारी विंशति विप्रान्॥ तृतीये त्रिंशत्कुमारी त्रिंशद्विप्रान्॥ चतुर्थे चत्वारिंशत्कु
मारी चत्वारिंशद्विप्रान्॥ द्विगुणैश्चंदनपुष्पादिभिश्च पूजा अस्मत्कृतस्य चंडिकापूजनकर्मणो॰
चंडिकाप्रसादात्सर्वं परिपूर्णमस्तु॥ यस्य स्मृ॰ नमः॥ प्रसादात्कुर्वतां कर्म॰ आवाहनं न जा॰॥
इति प्रार्थयेत्॥ ॥इति दुर्गापूजासमाप्ताः॥ ॥प्रथमे दिवसे दशविप्राणां एकैकं चंडीपाठं कुर्युः॥
द्वितीये द्वौ द्वौ॥ तृतीये ३॥ चतुर्थे ४ एवं दिनवृध्या चंडीपाठवृद्धिः॥ एतानि सप्तावरणानि लिखिता॥ १४
निशारदातिलकान्॥ तथाहि॥ अंगैरावरणं प्रथमं द्वितीयं युग्मशः स्मरेः॥ अष्टपत्रैस्तृतीयं स्यात्तच्छक्ति

निरंतरं॥ पंचमं मातृभिः प्रोक्तं षष्ठं लोकेश्वरैः स्मृतं॥ लोकपालायुधैः प्रोक्तं वज्राद्यैः सप्तमं तथा॥
व्यापिनी मालिनी पूर्वा शान्ता द्राविनी क्लेदिनी तथा॥ धारिणी मालिनी भूयोह्लंमिनी शांखिनी तथा॥ एता पंचे
षसंपूज्या घृतात्मगुग्गुलस्तकाः॥ ब्राह्मी माहेश्वरी भूयः कौमारी वैष्णवी तथा॥ वाराह्यानंतरेंद्राणी
चामुंडा सप्तमी तनः॥ अष्टमी स्यान्महालक्ष्मी प्रोक्तास्फ विश्वदुर्गा इति॥ इति चतुर्थदिन पर्यंतं कृत्वा॥ पं
चमे दिवसे प्रातर्होमं कुर्याद्विधानतः॥ इति देवीचरित्रे रुद्रयामलीयवचनात्पंचमे क्लि प्रातर्होममारभेत
॥ छ॥ ॥ अथ पंचमे क्लि होमविधिः॥ ॥ दुर्गां शिवां शांतिकरीं ब्रह्माणीं ब्रह्मणः प्रियां॥ सर्वलोक
प्रणेत्रीं च प्रणयामि सदा शिवां॥ १॥ मंगलां शोभनां शुद्धां निष्कलां परमां कलां॥ विश्वेश्वरीं विश्वपूज्यां
चंडिकां प्रणयाम्यहं॥ २॥ सर्वदेवमयीं देवीं सर्वरोगभयापहां॥ ब्रह्मेशविष्णुनमितां प्रणयामि सदा
शिवां॥ ३॥ विंध्यस्थां विंध्यनिलयां दिव्यस्थाननिवासिनीं॥ योगिनीं योगजननीं चंडिकां प्रणयाम्यहं
॥ ४॥ ईशानमातरं देवीमीश्वरीमीश्वरप्रियां॥ प्रणतोस्मि सदा दुर्गां संसारार्णवता ॥
रिणीं॥ ५॥ य इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः॥ स मुक्तः सर्वपापेभ्यः दुर्गया सह मोदते॥ ६॥ ॥
इति नमस्कारः॥ ॥ श्रीगणेशांबिकेनमः॥ ॥ ॐ ॐ ॐ कारं रूपं त्र्यक्षमीति त्रपरं यत्स्वरूपं तुरीयं त्रैगुण्या

तीतलीलकलयतीमनसःस्तेजसोद्भवन्तीयोगीन्द्राःब्रह्मरंध्रेसहस्रगुणमयंश्रीहेरंबेशसंज्ञं॥
गँगँगँगणेशगजमुखमभितोव्यापकंचिंतयंतं॥१॥ वँवँवँविघ्नराजंभजनिजभुजेन्यस्तदक्षिणेत्यस्ति
सुंढं। क्रँक्रँक्रँक्रोधमुक्तंदलितरिपुदलंकल्पवृक्षस्यमूलं॥ दँदँदँदंतवर्णमेकंदधतमुनि
मुखंकामधेन्वानिसेव्यं। धँधँधँधारयंतंधनमतिशयंसिद्धिबुद्धिर्दधंतं॥२॥ तुँतुँतुँतुंगरूपंगग
नपथिगतंव्याप्तमानंदिगंतांतान्। क्लींक्लींक्लींकामनाथंगलितमदजलोद्धतोलमत्तालिमालं
ह्रींह्रींह्रींकारपिंडंसकलमुनिवरंध्येयमुद्दंडसुंढं। श्रींश्रींश्रींसुश्रीयंतंनिखिलनिधिकुलंनौमि
हेरंबबिंबं॥३॥ स्लौंस्लौंस्लौंकारमाद्यंप्रणवमयमहामंत्रमुक्तावलीनां। शुद्धंविघ्नेशबीजंशशिक
रसुदृढेशंयोगिनांध्यानगम्यं॥ डँडँडँडामरूपंदलितभवभयंसूर्यकोटिप्रकाशं॥ यंयंयं
यज्ञनाथंयजतमुनिवराबाह्यतोभ्यंतरंच॥४॥ हुंहुंहुंहेमवर्णश्रुतिगणितगुणंशूर्पकर्णं
कृपालं॥ ध्येयंसूर्यस्यबिंबेह्युरसिचविलसत्सर्पयज्ञोपवीतं॥ स्वाहाहुंफट्नमोंतेठठडढसहि १५
तैःपल्लवैःसेव्यमानं। मंत्राणांसप्तकोटिप्रगणितमहिमाधारमीशंप्रपद्ये॥५॥ पूर्वंपीठंत्रिको
णंतदुपरिरुचिरंषड्दलपत्रंपवित्रं। तस्योर्ध्वंशुभ्ररेखंवसुदलकमलंबाह्यतोभ्योतरंच॥ मध्येहुंकार

बीजं नदत्तु भगवन्स्त्वां गडंगं रवटस्ते। अष्टैश्शक्तिश्च सिद्धिर्बुद्धिर्गणपतिर्विष्णुसत्याष्टकं च॥ ६॥ धर्मार्थिनो
त्रसिध्याद्दशादिशिगणान् बाह्यतोलोकपालान्। शास्त्रं होत्राधिनाथं मुनिकुलममखिलं मंत्रमुद्रोपदेशं॥
एवं यो भक्तियुक्तो यजति गणपतिं पुष्पधूपाक्षताद्यैः नैवेद्यैर्मोदकानां स्फुटतिलंदलनं गीतवादित्रना
दैः॥ ७॥ राजानस्तस्य भृत्या इव युवतिकुलं दासवत्सर्वदास्ते। लक्ष्मीः सर्वांगयुक्ता यजति न समनं किंकराः
सर्वलोकाः॥ पुत्राः पौत्राः पवित्राः रणभुवि तनुविनवाः द्यूतवादे प्रवीराः यस्येशो विघ्नराजो निवसति हृदये
भक्तिभाजं सुरेंद्रः॥ ८॥ ॥ इति श्रीमहागणपतिबीजमंत्राष्टकस्तोत्रं संपूर्णं॥ ॥ अथ प्रयोगं स्तवा
॥ शास्त्रोक्त॰ र्थं॥ ब्राह्मण द्वारा शतचंड्याख्य कर्माऽहं करिष्ये॥ तदंग त्वेन ब्राह्मणानां वरुण
ये मधुवरुणं॥ श्राद्धं॥ स्वस्ती वाचनं॥ वृद्धं नीकलश स्थापनं॥ कलशं स्थापनं सर्वत्र॥ पूजा स्थापनं।
दीपावलीकरणं॥ १०॰ कुतस्थुद्धिः॥ प्राणप्रतिष्ठा॥ मातृकान्यासः॥ पिठपूजा॥ अग्न्युत्तारणं॥
शोडशोऽपि पचोरपूजनं॥ आवर्णपूजा॥ योगिनीपूजा॥ ६४॥ पंचमे दीवसे होम॥ लक्ष्मीहोम
देवीपूजा॥ वन्हीपूजा॥ बलीदानं॥ पूर्णाहुति॥ सुश्रोद्दि॰॥ दानसंकल्पः॥ शरशावहोमः॥ कुमा १६
डीकासमाप्तः॥ अभिषेकः॥ आशीर्वादः॥ पानन्द्रवीडु होमः॥ वन्हिविसर्जनं॥ अनयेनमऽतिपुष्पा

मे

जलिः॥ गच्छ त्वं भगवन्नग्ने स्वस्थानं कुंडमध्यतः॥ हव्यमादाय देवेभ्यो शीघ्रं देहि प्रसीद मे॥१॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर॥ यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन॥२॥ इत्यग्निविसर्जनं॥
॥ ॥ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहं॥ विष्णुं रुद्रं श्रियं देवीं वंदे भक्त्या सरस्वतीं
॥१॥ स्थानदेवं नमस्कृत्य दिनानाथं निशाकरं॥ धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिं॥२॥ दै
त्याचार्यं नमस्कृत्य सूर्यपुत्रं शनैश्चरं॥ राहुं केतुं नमस्कृत्य यज्ञारंभे विशेषतः॥३॥ शक्रादि
देवताः सर्वा ऋषयश्च तपोधनाः॥ गर्गं मुनिं नमस्कृत्य नारदं पर्वतं तथा॥४॥ वसिष्ठं मुनिशा
र्दूलं विश्वामित्रं च गोभिलं॥ व्यासं कण्वं महर्षीकेशं देवलं गौतमं जपं॥५॥ भृगस्तं च पुलस्त्यं च
दक्षं पुत्रं पराशरं॥ अन्ये ये विद्यातपोयुक्ता वेदशास्त्रविचक्षणाः॥६॥ सर्वेभ्यः प्रणिपत्याहं यज्ञे रक्षां
करोतु मे॥७॥ ॥

॥संवत् १९८६ना वर्षे आषाढमासे कृष्णपक्षे नवम्यां तिथौ बुध १६
वासरे अद्येह श्रीसूर्यपुरे लिखितं॥ ॥दीक्षित हरिशंकरस्य पुस्तकं॥ ॥श्री॥ ॥